# विद्यामहत्वम् ।

1. विद्याधनं श्रेष्ठधनं तन्मूलमितरद्धनम् ।
दानेन वर्धते नित्यं न भाराय न नीयते ।।

2. रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।।

3. माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ।।

4. आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानं ।
बलवदपि शिक्षितानां आत्मन्यप्रत्ययं चेतः ।।

5. धनं धनं नैव मतं बुधानां विद्यैव वित्तं मतमस्ति तेषाम् ।
चौरो न यां चोरयितुं समर्थो भूपो पहर्तुं न च यां समर्थः ।।

6. विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।।

7 विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ।
नहि वन्ध्या विजानाति गुर्वी प्रसववेदनाम् ।।

8. सत्यं तपोज्ञानमहिंसा च विद्वत्प्रणामम् च सुशीलता च ।
एतानि यो धारयते स विद्वान् न केवलं यः पठनेन विद्वान् ।।

9. न चोरहार्यं न च राजहार्यम् न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धते एव नित्यम् विद्याधनं सर्वधनात् प्रधानम् ।।

10 अपूर्वः कोपि कोशोयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ।।

11. सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमं ।
अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा ।।

12. किं कुलेन विशालेन विद्याहीनस्य देहिनः ।
अकुलीनोपि विद्यावान् देवैरपि स पूज्यते ।।

13 जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
रीतिरेषा हि विद्यानां धर्मस्य च धनस्य च ।।

14. अन्नदानात् परं दानं विद्यादानमतः परम् ।
अन्नेन क्षणिका तृप्तिः यावज्जीवं च विद्यया ।।

15. नक्षत्रभूषणं चन्द्रो नारीणां भूषणं पतिः ।
पृथिवीभूषणं राजा विद्या सर्वस्य भूषणम् ।।

16. विद्या विनयोपेतो हरति न चेतांसि कस्य मनुजस्य ।
काञ्चनमणिसंयोगो नो जनयति कस्य लोचनानन्दम् ।।